शब्द–ब्रह्म

E ISSN 2320 – 0871

भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका

17 नवम्बर 2018

**पीअर रीव्यूड रेफ़्रीड रिसर्च जर्नल**

# व्याकरणदृष्ट्या साधुशब्दविवेचनम्

डा. जयकृष्णः

व्याकरण - प्राध्यापकः

राष्ट्रिय - संस्कृत - संस्थानम्, वेदव्यास परिसरः, बलाहरः

कांगडा, हिमाचलप्रदेशः, भारतम् - 177108

**शोधस्य संक्षेपः**

*साधुत्वस्य प्रतिपादकविषया स्मृतिः अस्ति व्याकरणम् । साधूनाम् असाधूनां च मध्येपरिचयं कारयित्वा असाधुभ्यः शब्देभ्यः साधून् शब्दान् पृथक् कृत्वा भाषायाः स्वरूपम् अक्षुण्णतया व्यवस्थापयति व्याकरणम् । व्याकरणस्य शास्त्रस्य अभावे भाषा चिरकालं यावत् एकरूपतां न भजते। कस्याः अपि संस्कृतेः शाश्वताय विकासाय तद्गतानां सांस्कृतिकानां मूल्यानां संरक्षणस्य भवति नितान्तम् आवश्यकता। सांस्कृतिकानि च मूल्यानि अविकृतायाः संस्कृतेः संरक्षणस्य कारणात् एव संरक्षितानि भवन्ति। संस्कृतेः च अविकृतत्वं तस्याः संस्कृतेः भाषायाः अविकृतत्वेन सम्भवति यतः भाषायाः विकृतौ तद्गतानां मूल्यानाम् अपि विकृतिः जायाते। भाषायदि दृढा अक्षुण्णा वा तर्हि तद्गतानां मूल्यानाम् अपि ह्रासः प्रायशः न भवति। अतः एव कारणात् सहस्रेभ्यः वर्षेभ्यः अपि प्राक् कालात् आरभ्य वैदिकाः सिद्धान्ताः लोके विद्यमानाः दृश्यन्ते। तत्र कारणं वैदिक्याः संस्कृतेः भाषायाः अक्षुण्णत्वम् एव। अस्याः भाषायाःअक्षुण्णत्वस्य स्थापने व्याकरणस्य महत् एव योगदानं वर्तते। भाषायाः प्रयोगस्य समये स्खालित्यानां प्रवृत्तिः दोषवशात् स्वाभाविकी एव मानवस्य। वस्तुतः एतेषां दोषाणां लोकस्य रूढौ आरोहणात् एव भाषायाः वास्तविकं स्वरूपं अपभ्रंशतां प्राप्नोति। संस्कृतभाषायाः प्रयोक्तारः अपि कदाचित् असामर्थ्यात् नियमाल्पज्ञानाद्वा अपभ्रंशे प्रवृत्तिं कुर्वन्ति येन तत्तदपभ्रंशः रुढिं प्राप्तुं यतते परन्तु तावता एव व्याकरणं सर्वं नियमयति आगत्य। अत्र लेखे पञ्चषाः प्रयोगाः तादृशाः गृहीताः प्रतिपादनाय येषु प्रयोक्तारः लक्ष्यन्ते केचन दोषमाचरन्तः। ते दोषाः न प्रसरेयुः अथवा प्रयोक्त्रन्तरस्य वाचि विलसनात् प्रागेव परिहृताः स्युः इति कश्चन प्रयासः अत्र तेषां प्रयोगाणां साधुत्वस्य प्रतिपादने क्रियते।*

मुख्य शब्द : *बोभूय्यते, मिष्टान्नम्, ककुद्मान्, गौः लक्ष्या/लक्ष्यम्, बीजाक्षरम् ।*

## प्रस्तावना

यद्यपि सत्यं यत् श्रवणभाषणादिना काचिद् अपि भाषा व्यवहारे रूढा भवति तथापि यथा श्रुतं तथैव प्रयोक्त्रा अनुस्रियते। यदि भाषायाः स्वरूपस्य अनुरूपं श्रुतं भवति तर्हि तदेव व्यवह्रियते यदि विपरीतं श्रुतं भवति तर्हि तदेव वा व्यवह्रियते। लोके सामान्यतया वयं पश्यामः अपि यत् बह्वीनां भाषाणां स्वरूपे प्रायशः पञ्चाशतो वर्षाणाम् अन्तराले किञ्चन वैलक्षण्यं परिवर्तनं वा दृश्यते। स्थानीयाः भाषाः याः न सन्ति तावत् लिपिबद्धाः तासां तु का कथा। तासां स्वरूपं प्रतिवर्षपञ्चके बेभिद्यमानं दृश्यते। तत्र कारणं लिपौ अबद्धानाम् आसां भाषाणां व्याकरणस्य अभावः अपि स्यात् । लिपिबद्धाः अपि बहवः भाषाः विकृतिं प्राप्ताः दृश्यन्ते। तत्र अपि कारणम् अस्माकं दृष्टौ तस्याः तस्याः भाषायाः व्याकरणस्य नियमेषु शैथिल्यं भवितुम् अर्हति इति चिन्त्यते। परन्तु देववाण्याः संस्कृतस्य विषये तु न तथा। अस्याः व्याकरणं तथा पुष्टं सुबद्धं प्राचीनं सद् अपि नित्यं नवीनं च वर्तते यत् दोषवशात् अपि संस्कृतभाषायाः स्वरूपं क्षुण्णं न भवति। तादृशाः दोषाः ये लोके अनवधानात्

शब्द-ब्रह्म
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
E ISSN 2320 – 0871
17 नवम्बर 2018
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

जायन्ते तेषां चिकित्सा अपि व्याकरणेन क्रियते। कतिपयानां तादृशानां दोषाणां परिहाराय अत्र लेखे यतामहे।

## शोध प्रकृति

अस्मिन् शोधपत्रे विमर्शेन युक्ता दृष्टिः प्रधाना अस्ति। अत्र प्रबन्धे ये शब्दाः चिन्तनाय स्वीकृताः सन्ति ते यद्यपि शास्त्रे शास्त्रकृद्भिः प्रत्यक्षतया परोक्षतया वा विचारिताः एव सन्ति तथापि दोषाणाम् अमीषाम् उल्लेखपूर्वकं प्रसङ्गानुगुणं च स्पष्टीकरणं यदि स्यात् तर्हि प्रयोक्तारः एतेषां प्रयोगाय दत्तावधानाः भविष्यन्ति।

## उद्देश्यम्

अपभ्रंशाः परिहृताः भवेयुः साधूनां च प्रतिष्ठापनं भवेत् यथापूर्वम् इत्येव शोधस्य पत्रस्य अस्य मुख्यम् उद्देश्यम् अस्ति।

शिष्टैः चेष्टिता शब्दानां सम्पत् एव प्रामाण्यं भजेत तदितरशब्दाः प्रामाण्यस्य कोटौ न प्रविशेयुः इति अनेन लेखेन पाठकाः कञ्चन उपयोगम् अनुभवेयुः। अत्र कृतेषु विचारेषु न्यूनतायां सत्याम् अन्यथात्वप्रतिपादने वा पाठकाः नूतनं चिन्तनं प्राप्नुयुः।

लोकात् सङ्ग्राहं सङ्ग्राहं एतादृशानां शब्दानां साधुत्वासाधुत्वप्रतिपादने प्रकाशने च शोधप्रबन्धस्य अस्य लेखकेन शब्दब्रह्मपत्रिकासहितं नैकासु अन्यासु अपि पत्रिकासु असकृद् यत्तं वर्तते।

## व्याकरणदृष्ट्या साधुशब्दविवेचनम्

### बोभूयते उत बोभूय्यते ?

'वृष्टिः बोभूयते, 'वृष्ट्या बोभूयते', 'वृष्ट्या बोभूय्यते' इत्येवं त्रिधा वाक्यं श्रूयते। अत्र तावत् प्रथमे द्वितीये च वाक्ये बोभूयते इति क्रियापदस्य स्वरूपस्य समानता दृश्यते। परन्तु तृतीयं यत् वाक्यं तस्य क्रियापदस्य स्वरूपे अस्ति कश्चन व्यत्यासः। व्यत्यासो नाम इह यकारस्य द्वयस्य घटकता विद्यते। अतः एवंविधानां वाक्यानां स्वरूपं दृष्ट्वा श्रुत्वा वा प्रयोक्तृषु सहजतया भ्रमः जायते यत् एषु प्रयोगेषु कतमः साधुः स्यात् प्रयोगः इति। यद्यपि अत्र उक्तानि त्रीणि अपि रूपाणि साधूनि एव वर्तन्ते परन्तु भ्रमवशात् अर्थान्तरे प्रयुक्तानि इमानि साधुत्वं न प्राप्नुवन्ति। अतः अमीषां रूपाणां स्पष्टतया प्रतिपत्त्यै उच्यते - एषु त्रिषु वाक्येषु 'वृष्टिः बोभूयते इति प्रथमे वाक्ये लट् कर्तुः अर्थे विद्यते। तन्नाम बोभूय इत्यस्मात् यङन्तात् धातोः आख्यातः तिप्[2] अत्र कर्तुः[3] अर्थे अस्ति। अतः 'वृष्टिः बोभूयते इति प्रयोगः युज्यते। ननु 'वृष्ट्या बोभूयते' इति प्रयोगः कथं साधुः स्यात् इति आशङ्का जायते। यतः 'वृष्टिः बोभूयते इत्यत्र यथा कर्तरि लटो रूपं श्रूयते तथैव 'वृष्ट्या बोभूयते' इत्यत्रापि लट् श्रूयते। 'वृष्ट्या बोभूयते इत्यत्र तु लकारः भावे अस्ति। कथं तर्हि कर्तरि भावे च श्रूयमाणयोः क्रियापदयोः साम्यं दृश्येत इति जिज्ञासा जायते। अत्र वदामः - 'वृष्ट्या बोभूयते' इत्यस्मिन् प्रयोगे बोभूयते इति यङ्लुगन्तः प्रयोगः अस्ति। प्रकृते बोभूय इति धातौ विहितस्य यङो लुक्[4] भवति। ततः अवशिष्टात् बोभू इत्यस्मात् धातोः विहितस्य यकः[5] श्रवणं क्रियापदे भवति। अतः भावे विहितः अयं प्रयोगः यङ्लुगन्तः साधुः भवति। 'वृष्टिः बोभूयते' इत्यत्र तु क्रियापदमध्यस्थः यवर्णः यङः प्रत्ययस्य अंशभूतः। अतः द्वयोः क्रियापदयोः यवर्णभेदस्य अवगमनपूर्वकं स्पष्टं भवति यत् उभयोः अपि उक्तयोः प्रयोगयोः 'बोभूयते' इति क्रियापदस्य साधुत्वम् अस्ति एव। ननु एतावत् विचार्य कथं तर्हि 'वृष्ट्या बोभूय्यते' इत्यस्मिन् प्रयोगे यकारद्वयघटकता श्रूयते दृश्यते वा इत्यत्र

अपि प्रयोक्तॄणां सहजः भ्रमः जायते। तद्वारणाय कथयामः यत् 'वृष्ट्या बोभूय्यते इत्यत्र एकः यकारः क्रियासमभिहारार्थे विहितस्य यङः श्रूयते यः तावत् प्रथमः। द्वितीयस्तु भावेर्थे सार्वधातुके परे यङन्तात् विहितस्य यकः अस्ति। अतः यकारद्वयघटकं रूपम् अपि भावविवक्षायां साधु एव इति बोध्यं भवति। ननु एतावता विज्ञाय पाठकः शङ्केत यत् यथा यङः लुक् 'वृष्ट्या बोभूयते' इत्यत्र कृतम्। तथैव 'वृष्ट्या बोभूय्यते इत्यत्र यङः लुक् कुतः न स्यात् इति ? अथवा एकत्र यङः लुक् अपरत्र यङः लुक् न इति कथं व्यवस्था इत्यादि चिन्त्येत। एतादृश्याः शङ्कायाः समाधाने तत्र बिन्दुद्वयं कथयामः - प्रथमतया तावत् 'वृष्टिः बोभूयते, 'वृष्ट्या बोभूयते, 'वृष्ट्या बोभूय्यते' इति त्रिविधः अपि प्रयोगः संस्कृतभाषायाम् अन्तर्भवति। अतः प्रयोगानुसारं व्याकरणेन व्यवस्था कर्तव्या भवति। द्वितीयबिन्दुत्वेन वैयाकरणी अपि व्यवस्था अत्र प्रतिपाद्यते, तदेवम् - यद्यपि यङः लुकं कर्तुं निमित्तानि यथा 'बोभूयते' इत्यत्र सन्ति तथैव 'बोभूय्यते' इत्यत्र अपि सन्ति एव। तथापि 'बोभूय्यते' इत्यत्र तु यङः लुक् न भवति। तत्र उक्तं लुग्विधायकं शास्त्रं प्रति गत सूत्रात् अनुवृत्तं बहुलम्[6] इति पदं कारणं भवति। क्वचित् प्रवृत्तिः क्वचित् अप्रवृत्तिः क्वचित् विभाषा क्वचिच्च अन्यदेव इत्यादयः अर्थाः व्याकरणनये बहुलम् इत्यस्य सन्ति प्रसिद्धाः। अतः प्रयोगं दृष्ट्वा बहुलग्रहणसामर्थ्यात् क्वचित् यङः लुक् क्वचित् च अलुक् भवति इति कश्चन वैयाकरणः सिद्धान्तः। अत एव भावे क्वचित् यङ्हितः त्वचित् यङ्सहितः प्रयोगः श्रूयते।

## मिष्ठान्नम् आहोस्वित् मिष्टान्नम्?

'बालकाय मिष्ठान्नं रोचते' इत्येवं मिष्ठान्न इति शब्देन युक्तः प्रयोगः असकृत् श्रूयते प्रयोक्तृषु। अस्य वाक्यस्य स्थाने 'बालकाय मिष्टान्नं रोचते' इति वाक्यस्य प्रयोगः एव साधुः। मिष्ठान्नम् इति संस्कृतेन अपि व्यवहारः मातृभाषायाः प्रभावकारणात् स्यादिति चिन्तयामः। उक्तयोः वाक्ययोः द्वयोः अपि मिष्ठान्न मिष्टान्न इति शब्दयोः एव भेदः दृश्यते। एकत्र षकारोत्तवर्ती महाप्राणः ठकारः दृश्यते अपरत्र च षकारोत्तरवर्ती अल्पप्राणः टकारः दृश्यते। टकारवान् मिष्टान्न इति शब्द एव साधुत्वं भजते। तथाहि - मिष्टं च एतत् अन्नञ्च इत्येवं विगृह्य विशेषणं विशेष्येण अत्र समस्यते[7]। समासे अत्र पूर्वपदत्वेन मिष्ट इति पदं मिषु[8] इति धातोः क्त[9] इति प्रत्ययस्य योजनेन निर्मितं भवति। अत्र मिष् त इति अवस्थायां तकारस्य ष्टुत्वेन[10] टकारः लभ्यते न तु ठकारः। एवं तर्हि मिष्टान्न इति शब्दयुक्तः प्रयोगः शुद्धः इति फलति। मिष् इति धातोः अपेक्षिते अर्थे ठकारः कथञ्चित् अपि न लभ्यते इत्यतः मिष्ठान्न इति प्रयोगः असाधुः भवति। ननु अत्र विचार्यते यत् मिष् इति धातुः भ्वादौ पठितः सेट्, सकर्मकः परस्मैपदी च अस्ति। धातुः अयं सेट् इत्यतः इटः[11] श्रवणं वलादौ आर्धधातुके क्त इति प्रत्यये परे स्याद् एव। तेन इटो व्यवधानात् ष्टुत्वस्य स अभावत् मिषितम् इति रूपं स्यात्। कथं तर्हि मिष्टम् इति रूपं भवेत् इति चेत् अत्र कथयामः - मिष् इति धातुः उदित् अस्ति। उदितः ये सन्ति धातवः तेभ्यः धातुभ्यः क्त्वा[12] इति प्रत्यये परे विकल्पेन इड् विहितः। यस्य च कुत्रचित् विकल्पेन इड् विहितः भवति तस्मात् निष्ठासञ्ज्ञकस्य क्त इति प्रत्ययस्य इट् न भवति इति अस्ति कश्चन निषेधः[13]। एवं तर्हि मिष् इति धातुः सेट् सन् अपि क्त इति प्रत्यये परे इटा सहितः न भवति तस्य उदित्वात्। तस्मात् 'मिष्टम्' इति प्रयोगस्य व्युत्पत्तिपक्षे अपि या का अपि आपत्तिः न भवति। इत्येवं

शब्द–ब्रह्म
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
E ISSN 2320 – 0871
17 नवम्बर 2018
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

तर्हि अस्माभिः सर्वदा मिष्टान्नम् एव भक्षणीयं न तु मिष्ठान्नम्।

## पाश्चात्यम् उत पाश्चात्त्यम् आहोस्वित् पाश्चात्त्त्यम् ?

'पाश्चात्यं / पाश्चात्त्यं / पाश्चात्त्त्यं भोजनं भारतीयानाम् आरोग्यकरं नास्ति इति अस्मिन् वाक्ये पाशात्त्य इति शब्दः श्रूयते। तत्र प्रयोक्तारः लेखनस्य समये संशयस्य कारणात् कदाचित् एकं तकारं कदाचित् द्वौ तकारौ च लिखन्ति। मम एकः सुहृद् कदाचित् अत्र प्रयोगे तकारस्य द्वित्वं विधाय त्रीन् तकारान् अपि किं लेखितुं शक्नुयाम वा इति प्रश्नं कृतवान् जिज्ञासायाः वशात्। अत्र ईषत् वदामि - पश्चात् भवः इति अस्मिन् तद्धितेषु विद्यमाने शैषिके अर्थे पश्चात् इति शब्दात् त्यक्[14] इति प्रत्ययः भवति। त्यक् अस्ति कित् अतः आद्यस्य पकारात् परस्य अकारस्य आ इति वृद्धिः[15] भवति। एवं तर्हि एकः तकारः पाश्चात् इति सम्पन्नस्य शब्दस्य प्राप्तः भवति अपरः च तकारः त्यक् इत्यस्य प्रत्ययस्य प्राप्तः भवति। आहत्य द्वयोः तकारयोः लाभात् तकारद्वयेन युक्तं रूपं लभ्यते। एवं तर्हि पाश्चात्त्य इति द्वाभ्यां तकाराभ्यां युक्तं रूपं तु शास्त्रीयं निर्दुष्टं च इति ज्ञातव्यम्। अधुना एकेन एव तकारेण युक्तस्य रूपस्य चर्चां कुर्मः। वस्तुतः संस्कृतात् इतरस्यां भाषायाम् एकस्य तकारस्य श्रवणं पाश्चात्य इति प्रयोगे स्यात्। तस्य एव प्रयोगस्य भ्रमस्य वशात् संस्कृतेन अपि एकेन तकारेण युक्तं रूपं स्युः प्रयोक्तारः पाश्चात्य इति व्यवहरन्तः, परन्तु संस्कृतेन द्वाभ्यां तकाराभ्याम् एव पाश्चात्त्य इति अस्य शब्दस्य प्रयोगः युज्यते। द्वौ तकारौ च कथं प्राप्तौ भवतः इति प्रतिपदितम् एव। तत्र द्वयोः मध्ये एकस्य लोपस्य विधानम् अपि तावत् व्याकरणे शास्त्रे नास्ति। अतः एकेन तकारेण अस्य शब्दस्य व्यवहारः असाधुः एव। अधुना त्रिभिः तकारैः अपि प्रयोगस्य साधुत्वं स्यात् वा अथवा न इति विचारयामः। पाश्चात् त्य इति अवस्थायाम् आकारात् अचः परस्य तकारस्य यरः अनचि परे द्वित्वे[16] पाश्चात् त् त्य इति त्रयः तकाराः लभ्यन्ते। इदं द्वित्वं विकल्पेन भवति इति कारणात् अपरस्मिन् पक्षे द्वौ तकारौ अपि यथावत् तिष्ठतः एव। अधुना अत्र शङ्का जायते यत् पाश्चात् त् त्य इति अवस्थायाम् त्यक् इति स्वादौ प्रत्यये परे पाश्चात् त् इति एतावतः समुदायस्य पदसञ्ज्ञायां[17] सम्पन्नस्य अस्य पदस्य अन्ते संयोगस्य कारणात् संयोगस्य अन्ते विद्यमानस्य तकारस्य लोपः[18] स्यात् इति। तथा चेत् त्रिषु तकारेषु मध्ये विद्यमानस्य लोपस्य द्वारा पुनरपि द्वौ एव तकारौ प्राप्तौ स्यातां न तु त्रयः तकाराः अस्मिन् प्रयोगे प्राप्ताः स्युः इति भाति। अतः त्रिभिः तकारैः युक्तं पाश्चात्त्त्यम् इति रूपं न सङ्गतम् इति ज्ञायते इति चेद् अत्र प्रतिपादयामः इतोऽपि - त्रिभिः तकारैः युक्तं रूपम् अपि साधुः एव। तत्र कारणम् संयोगान्तस्य लोपस्य अभावः अस्ति। वस्तुतः संयोगान्तस्य लोपस्य दृष्टौ द्वित्वस्य विधायकं शास्त्रम् एव नास्ति तस्य असिद्धत्वात्[19]। तद् द्वित्वं तु अस्माकं शास्त्रस्य अध्येतृणां दृष्टौ एव अस्ति। संयोगान्तलोपः यदा द्वित्वम् एव न पश्यति तर्हि तेन तस्य द्वित्वस्य कारणात् उत्पन्नः संयोगः अपि न ज्ञायते। संयोगस्य अभावे च संयोगान्तस्य लोपः अपि न संभवति अत्र प्रयोगे। अतः पाश्चात्त्य इति पाश्चात्त्त्य इति च द्वयोः प्रयोगयोः साधुत्वम् अस्ति। एकः तकारः तु सर्वथा असाधुः एव।

## ऐं ह्रीं क्लीं इत्यादीनां व्युत्पादनं किं शक्यम्?

'ओम् ऐं ह्रीं क्लीं चामुण्डायै विच्चे इत्यादीनि वाक्यानि दृश्यन्ते पुराणेषु। पौराणिके वाङ्मये

तावत् मन्त्र इति सञ्ज्ञया एव व्यवहारः एतादृशानां वाक्यानाम्। यद्यपि मन्त्रः अपि पदानाम् एव समूहः। पदेषु चापि वर्णाः सन्निहिता भवन्ति एव। अतः तादृशाः एव वर्णाः तादृशानि एव च पदानि अस्मिन् वाक्ये अपि सन्ति एव। यद्यपि व्याकरणस्य दर्शनत्वस्य पक्षे महावाक्यस्य एव अस्तित्वम् अस्ति स्फोटरूपस्य। वर्णाः पदानि च तु न भवन्ति एव इति भर्तृहरिवर्यः[20] छान्दसं शब्दस्वरूपं कथयति प्रतिपादयन्। मननात् त्रायते इति व्युत्पत्त्या वाक्यस्य अस्य मन्त्रत्वम् अपि स्यात् एव जातुचित्। भवतु स्यात् नाम अयं मन्त्रः परन्तु वैयाकरणैः तु तावत् सर्वस्य अपि शब्दस्य व्युत्पादनं भवति चिन्तनीयम्। वाक्ये अत्र ऐं ह्रीं क्लीं इत्यादयः शब्दाः सन्ति। बीजाक्षराणि इमानि इति अपि एषां व्यवहारः। एषाम् ऐम् आदीनां व्याकरणस्य दृष्ट्या प्रकृतेः प्रत्ययस्य च विभागस्य द्वारा व्युत्पादनं कथं स्यात् इति एकदा मम मित्रेण जिज्ञासा कृता। मया तस्य जिज्ञासायाः करणस्य दिनात् आरभ्य मयि उपस्थितं पाणिनीयं शास्त्रं समग्रं शब्दस्य अस्य व्युत्पत्त्यर्थम् आलोडितम् परन्तु प्रत्यक्षः उपायः न कः अपि अवबुद्धः। यद्यपि शिष्टैः प्रयुक्तानां शब्दानां येषां च व्युत्पादनं न सम्भवति तादृशानां पाठः स्वयं पाणिनिना भगवता पृषोदरादिगणे[21] अनुमतः अस्ति। यद्यपि अस्मिन् गणे ऐम् इत्यादीनि बीजाक्षराणि न दृश्यन्ते तथापि अस्य गणस्य आकृतिगणत्वं स्वीकृतं वर्तते विद्वद्भिः। अतः प्रयोगान् दृष्ट्वा तत्र शिष्टेन प्रयुक्तस्य अव्युत्पादितस्य अन्तर्भावः कर्तुं शक्यते इति कश्चन नयः वैयाकरणानाम्। यद्यपि पुराणानां कालात् पृष्ठवर्तिनि काले वेदादिषु ग्रन्थेषु ऐम् इत्यादीनां बीजाक्षराणां प्रयोगः अस्ति वा न वा इति तु कश्चन अनुसन्धानस्य विषयः अस्ति। अत्र अस्य लेखस्य माध्यमेन विद्वत्सु एषाम् बीजाक्षराणां यदि कोऽपि व्युत्पत्तेः प्रकारः स्यात् तर्हि नूनम् एव सूचयन्तु इति प्रार्थये। अथवा यदि पृषोदरादिगणे एषाम् अन्तर्भावं कर्तुं किमपि उपोद्बलकं प्रमाणं स्यात् तर्हि तदपि कथयन्तु इति अभ्यर्थये। अथवा व्याकरणान्तरे एषां व्यवस्था अस्ति चेत्तदपि ज्ञापयन्तु।

## निष्कर्ष

लेखे अत्र चत्वारः एव विचाराः विहिताः। यद्यपि अधीतशास्त्राणां तु एतेषु प्रतिपादितेषु विषयेषु तथा विशेषो नानुभूयेत तथापि शास्त्रान्तरीयाः जनाः अथवा अत्र प्रतिपादितान् विचारान् ससंशयं प्रयोक्तारः ये जनाः ते निश्चयेन एव अभिनवं किञ्चन चिन्तनम् एतया शब्दचतुष्टय्या प्राप्स्यन्ति एव इति विश्वसीमि। प्रतिपादितेषु चतुर्षु अपि विचारेषु ऐम् इत्यादीनां बीजाक्षराणां व्युत्पत्तिपरकः विचारः विशिष्टं महत्त्वं भजते इति मे भाति। अतः अस्य विचारस्य अपि अस्याः पत्रिकायाः माध्यमेन सर्वत्र विद्वत्सु उपस्थितिः भविष्यति कश्चन च सिद्धान्तः प्रतिष्ठापितः भविष्यति इति अहं विश्वसीमि। अस्यां पत्रिकायां शब्दचिन्तनविषयकाः अन्ये अपि मया लेखाः प्रदत्ताः सन्ति एव इत्यतः अस्यापि लेखस्य माध्यमेन शब्दचिन्तनं संस्कृतस्य सुचिन्तकेषु पाठकेषु प्रसरिष्यति इति विशेषम् अनुमिनोमि।

## सन्दर्भ ग्रन्थ

*1 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - 286, सूत्रसंख्या - 3.1.22*

*2 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - 533, सूत्रसंख्या - 3.4.78*

*3 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर*

ट्रस्ट, रेवली - सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - 527, सूत्रसंख्या - 3.4.69

4 गिरिधरशर्मा (सम्पादकः), वैयाकरणसिद्धान्तकौमुदी (पंचम संस्करण) 2011, मोतीलाल बनारसीदास, वाराणसी, तृतीय भाग, पृष्ठ संख्या- 476, सूत्रसंख्या - 2654

5 गिरिधरशर्मा (सम्पादकः), वैयाकरणसिद्धान्तकौमुदी (पंचम संस्करण) 2011, मोतीलाल बनारसीदास, वाराणसी, तृतीय भाग, पृष्ठ संख्या- 588, सूत्रसंख्या - 2756

6 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - 272, सूत्रसंख्या - 2.4.72

7 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - 180, सूत्रसंख्या - 2.1.56

8 जनार्दन हेगडे (निर्माता), धातुरूपनन्दिनी, (द्विती संस्करण) 2013, संस्कृतभारती, नव देहली, पृष्ठ संख्या - 129, धातुसंख्या - 699

9 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - 529, सूत्रसंख्या - 3.4.72

10 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - 625, सूत्रसंख्या - 8.4.40

11 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, तृतीय भाग, पृष्ठ संख्या - 410, सूत्रसंख्या - 7.2.35

12 गिरिधरशर्मा (सम्पादकः), वैयाकरणसिद्धान्तकौमुदी, (पंचम संस्करण) 2011, मोतीलाल बनारसीदास, वाराणसी, चतुर्थ भाग, पृष्ठ संख्या - 353, सूत्रसंख्या - 3320

13 गिरिधरशर्मा (सम्पादकः), वैयाकरणसिद्धान्तकौमुदी (पंचम संस्करण) 2011, मोतीलाल बनारसीदास, वाराणसी, चतुर्थ भाग, पृष्ठ संख्या - 88, सूत्रसंख्या - 3025

14 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, द्वितीय भाग, पृष्ठ संख्या - 115, सूत्रसंख्या - 4.2.97

15 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, तृतीय भाग, पृष्ठ संख्या - 383, सूत्रसंख्या - 7.2.118

16 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, तृतीय भाग, पृष्ठ संख्या - 627, सूत्रसंख्या - 8.4.46

17 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - 114, सूत्रसंख्या - 1.4.17

18 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, तृतीय भाग, पृष्ठ संख्या - 519, सूत्रसंख्या - 8.2.23

19 गिरिधरशर्मा (सम्पादकः), वैयाकरणसिद्धान्तकौमुदी, (पंचम संस्करण) 2011, मोतीलाल बनारसीदास, वाराणसी, प्रथम भाग, पृष्ठ संख्या- 12, सूत्रसंख्या- 20

20 रामनारायणदास (निर्माता), ब्रह्मकाण्डस्य समीक्षा, (पंचम संस्करण) 2003, राष्ट्रिय संस्कृत संस्थान, बलाहर परिसर, पृष्ठ संख्या - 76, श्लोकसंख्या - 72

21 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, तृतीय भाग, पृष्ठ संख्या - 217, सूत्रसंख्या - 6.3.108